## मानवाधिकाराणां कृते संयुक्त-राष्ट्र-उच्चायोगे सर्वेषामपि कृते सर्वेषां मानवाधिकाराणां जागत-अभिघोषणायाः प्रस्तावना

यत्र जगति शान्तिन्यायस्वातन्त्र्याणां आधार: मानवपरिवारस्य सर्वेषामपि सदस्यानां साम्यानां अखण्डितानाञ्च अधिकाराणां पारम्परिक-गौरवस्य चाभिज्ञाने स्यात् यत्र मानवाधिकाराणां अवमानेन अनादरेण च कार्याणि दुर्दान्तरूपे परिणमितानि यैश्च मानवीयचेतना विक्षोभिता तत्कारणेन सामान्य-जनानां उच्चतमाकांक्षा: अभिघोषिता: स्यु: एवं च नूतनविश्वारम्भेण मानवा: अभिव्यक्ते: स्वातन्त्र्यमनुभवितुं शक्ताः स्युः निर्भयाः भवेयुः। यत्र चैतत् अनिवार्यं भवेत् यत् शोषणात्याचारान् विरुध्य अन्तिम-प्रयासत्वेन मनुष्य: प्रयासानुष्ठानार्थं नैव विवशीक्रियते चेत्तदा मानवाधिकारा: विधि-नियमेन संरक्षणीया:। यत्र च राष्ट्रेषु परस्परं सख्य-सम्बन्धानां विकासजातं समुन्नेतुं परमावश्यकं स्यात्, यत्र मौलिकेषु मानवाधिकारेषु संयुक्तराष्ट्रसंघस्य जना: घोषणापत्रे स्वीयास्थां दृढीकृतवन्त: बृहत्तरे च स्वातन्त्र्ये भद्रतरं जीवनस्तरं सामाजिक-प्रगतिं च समुन्नेतुं निर्णीतवन्तः स्त्री-पुरुषाणां साम्याधिकारेषु मानव-व्यक्ते: गौरवे मूल्ये च निष्ठां दृढीकृतवन्तः यत्र एतद् सदस्याः मौलिक-स्वातन्त्र्याणां मानवाधिकाराणाञ्च परिपालनार्थं वैश्विकादरस्य समुन्नतये च संयुक्तराष्ट्रसंघेन संभूय प्रतिश्रुता: अभवन् यत्र स्वीय-प्रतिश्रुतीनां परिपूर्णतायै एतेषां अधिकाराणां स्वातन्त्र्याणां च सामान्यावगमनं महत्तमं महत्त्वाधायि च अभूत् तदर्थं साम्प्रतम् महासभा सर्वेषां राष्ट्राणां सर्वेषां च जनानां कृते सामान्योपलब्धिस्तररूपेण मानवाधिकाराणां एनां जागताभिघोषणां अभिघोषयति। समाजस्य प्रत्येकमप्यंगम् प्रत्येकोऽपि जन: मनसि सततमेनामभिघोषणां निधाय एतेषां अधिकाराणां स्वातन्त्र्याणां च कृते सम्मानं समुन्नेतुं शिक्षाध्यापनार्थं प्रयतिष्यते तथा च स्वीयक्षेत्राधिकारान्तर्गतक्षेत्रवास्तव्येषु जनेषु स्वेषु च सदस्यदेशेषु तदीयेषु जनेषु च स्वीयवैश्विकप्रभाविपरिपालनाभ्युपगमनानि संरक्षितुं आन्ताराष्ट्रिकाणां राष्ट्रिकाणाञ्च प्रगतिशीलोपायानां च माध्यमेन प्रयतिष्यते।

**अनुच्छेद: 1** सर्वे मानवा: जन्मत एव स्वतन्त्रा: जायन्ते। गौरवदृशा अधिकारदृशा अपि सर्व एव समानाः वर्तन्ते। सर्व एव च चित्तर्कशक्तिभ्यां सुसम्पन्ना:। सर्वेऽपि च भ्रातृत्व-बन्धुत्व-भावनया परस्परं व्यवहरन्तु।

**अनुच्छेद: 2** अस्यां अभिघोषणायां निर्दिष्टा: सर्वेऽपि अधिकारा: सर्वविधमपि स्वात्न्त्र्यं जाति-वर्ण-लिंग-भाषा-धर्म-राजनीतिक-तदितर-मन्तव्यादि-भेदम् विहाय, राष्ट्रपरं सामाजिकाधारं सम्पज्जन्म-तदितर स्तरञ्च परिहृत्य, सर्वोऽपि जन: अधिगन्तुं प्रभवति। अतः परं कस्याश्चिदपि प्रभुसत्ताया: नियमनान्तर्गतम् स्वाधीनस्य आत्मप्रशासनेतर-तन्त्रस्य न्यासितन्त्रस्य वा वास्तव्यस्य प्रदेशस्य देशस्य वा राजनीतिक-सीमा-निबन्धनान्ताराष्ट्रिक-स्तराधारेण न कोऽपि भेदो विधास्यते।

**अनुच्छेद: 3** सर्वोऽपि जन: प्राणरक्षास्वातन्त्र्यसुरक्षाधिकारान् भोक्तुं सर्वथा समर्थः।

**अनुच्छेद: 4** न च कोऽपि जनः बलाद्दासीकर्तुं पारतन्त्र्यञ्च भोक्तुमनुज्ञास्यते। दासक्रयविक्रयव्यापारश्च पूर्णरूपेण प्रतिषिद्धः स्थास्यति।

**अनुच्छेद: 5** न च कस्मैऽपि जनाय बलात्कारेण तिरस्क्रियाव्यवहारः दण्डनममानवीयं कटुप्रतोदनं दातुं कोऽपि समर्थः भवेत्।

**अनुच्छेद: 6** विधिप्रक्रियामनुसृत्य सर्वोऽपि जन: स्वात्मनः अभ्युदयं प्रकटयितुं समर्थः।

**अनुच्छेद: 7** विधे: समक्षं सर्वोऽपि जनः समानः वर्तते। अपि च समानं सर्वविध संरक्षणमवाप्तुमर्हति। अस्या: अभिघोषणाया: उल्लंघने सति कमपि भेदं अथवा एतादृश भेदं वा अभिलक्ष्य तद्विरोधार्थं सर्वेऽपि समान-संरक्षणार्हा: वर्तन्ते।

**अनुच्छेद: 8** विधिना संविधानेन वा प्रदत्तानां मौलिकाधिकाराणामुल्लंघन-कार्याणां कृते, योग्यै: राष्ट्रीय-न्यायपीठै: संस्तुतानां प्रभाविनां समुपायानां प्रयोगार्हो हि सर्वो जनोऽस्ति।

**अनुच्छेद: 9** कोऽपि जन: अधिकारीणां स्वैराचारमाश्रित्य निग्रहीतुं धर्तुं निष्कासयितुं वा नानुज्ञास्यते।

**अनुच्छेद: 10** सर्वोऽपि जन: आत्मनः विरुद्धस्य कस्यापि आपराधिकाक्षेपस्य तथा स्वीयाधिकाराणां दायित्वानां च विनिर्धारणे च कृते स्वाधीनेन निष्पक्षेण च न्यायपीठेन विधीयमानस्य समुचितस्य सार्वजनिकस्य विवादश्रवणस्य च कृते सर्वोऽपि जन: पूर्णां समानतां धारयति।

**अनुच्छेद: 11** सार्वजनिकाभियोगप्रकरणे विधिमनुसृत्य यावत्कालं कोऽपि जनः प्रमुखापराध-सिद्धिं नैव भजते, तावत्पर्यन्तं निर्दुष्ट: इत्यामंस्यते। अपि च, स्वीय-प्रतिरक्षार्थं तेन जनेन सर्वमपि आवश्यक-प्रतिभूतिजातं उपपादनीयं वर्तते।

यावद् अन्ताराष्ट्रिकस्य राष्ट्रिकस्य वा विधेरन्तर्गतस्य प्रमुखापराध-निष्प्रभावकस्य कस्यापि कार्यस्य कारणात् न कोऽपि प्रमुखापराधार्थं अपराधीति गणयिष्यते। तावत्पर्यन्तं प्रमुखापराध-काले प्रवर्तनीय-दण्ड-दानात् नाधिकतरो दण्ड: कस्मिंश्चिदपि प्रवर्तनीयो भविता।

**अनुच्छेद: 12** कस्यापि प्रातिस्विके पारिवारिके वा जीवने गृहे पत्रव्यवहारे च स्वैरतया हस्तक्षेपोनानुज्ञास्यते, न वा कस्यापि ख्यातिं सम्मानं वा दूषयितुं कोऽपि शक्ष्यति। एतेषाम् ईदृशानां हस्तक्षेपापक्रमणानां विरोधाय प्रत्येकोऽपि जन: विधि-संरक्षणं प्राप्तुं समर्थः।

**अनुच्छेद: 13** प्रत्येको जनः राष्ट्रस्य सीम्नि स्वावासस्य गमनागमनस्य च स्वातन्त्र्याधिकारं संधारयति। स्वदेशोपेतं कमपि देशं त्यक्तुं स्वदेशं च प्रत्यागन्तुं प्रत्येक एव जनः अधिकृतोऽस्ति।

**अनुच्छेद: 14** उपद्रवेभ्यो स्वात्मानं रक्षितुम् अन्यदेशेषु शरणमधिगन्तुं प्रत्येक एव अधिकारं संधारयति। संयुक्तराष्ट्रसंघस्य सिद्धान्तानां उद्देश्यानां च प्रतिकूलकार्यसम्पादने सति राजनीतिकेतरापराधानां कृते समुत्थितेषु वास्तविकाभियोगप्रकरणेषु अयमधिकारो नैव प्रभावकरः।

**अनुच्छेद: 15** प्रत्येकोऽपि राष्ट्रियताया: अधिकारधारणे समर्थः।

१.न केनापि स्वैराचारेण स स्वीयराष्ट्रीयतातो वञ्चित: स्यात् न वा स्वीय-राष्ट्रीयता-परिवर्तनाधिकारात् प्रत्याख्यातो भवेत्।

**अनुच्छेद: 16** पूर्णवयस्कः स्त्रीपुरुषः जातिधर्मराष्ट्रीयताआदि बन्धनमनादृत्य स्वं स्वं परिवारं प्रतिष्ठापयितुं वैवाहिकञ्च जीवनम् स्वीकर्तुं सर्वथा स्वतन्त्रता वर्तन्ते। विवाहार्थं विवाहावसरे विवाहविच्छेदेकाले वा ते सर्वे समानाधिकारधारणेऽपि स्वाधीनाः सन्ति।

१.विवाहेच्छुकानां पूर्ण-स्वतन्त्र-सहमत्यैव विवाह-संस्कार: अनुष्ठेयोऽस्ति।

२.परिवारस्तु समाजस्य स्वाभाविको मौलिकश्च अविच्छेद्यः एकाँशो वर्तते अपि चायमंशः समाजेन राष्ट्रेण वा संरक्षणीयोऽस्ति।

**अनुच्छेद: 17** प्रत्येकोऽपि जनः अन्येषां सहयोगेसन्तिष्ठन् अथवा एकाकि अपि स्वसम्पत्संधारणे स्वामित्वाधिकारं लभत एव।

१.न कोऽपि जनः स्वीयसंपत्स्वामित्वाधिकारात् परेषां स्वैराचारेण वञ्चितो भवितुमर्हति।

**अनुच्छेद: 18** प्रत्येक एव जनः विचारानुभूत्यादि धर्मस्य च धारणे स्वातन्त्र्याधिकारं संधत्ते। अनेनैवाधिकारेण समं सर्वोऽपि जनः प्रातिस्विके समाजिके च जीवने अथवा अन्यैः सह सामुदायिकजीवननिर्वाहे स्वीयं धर्मं विश्वासं वा अनुगन्तुं शिक्षयितुं पूजयितुं परिपालयितुं वा स्वातन्त्र्यं धारयति अपि च अनेनैव समं स्वीयं धर्मं विश्वासं स्वातन्त्र्यमपि परिवर्तयितुं समर्थः भवति।

**अनुच्छेद: 19** प्रत्येक एव जनः किमपि सीमाव्यवधानमनादृत्य स्वमन्तव्याभिप्रायप्रकाशनाधिकारं लभत एव तथा च केनापि सञ्चारमाध्यमेन हस्तक्षेपं विनैव विचाराणां सूचनानां च आदान-प्रदाने स्वीय-मन्तव्य-संधारणेऽधिकृत एव वर्तते।

**अनुच्छेद: 20** प्रत्येकोऽपि जन: शान्तिपूर्णरीत्या सभासम्मेलनादिकं सयोजयितुमर्हो वर्तते।

१.स च न केनचिदपि संघटनेन सह आत्मानं संयोजयितुं परवशं कर्तुं शक्यते।

**अनुच्छेद: 21** प्रत्येक एव जनः स्वीयराष्ट्रस्य प्रशासनविधौ प्रत्यक्षरीत्या अथवा केनापि निष्पक्षनिर्वाचित-प्रतिनिधि-द्वारेण समानभाग्भवितुमर्हति। तथा च तस्मिन्नेव राष्ट्रे लोकसेवाया: समानमधिकारं संधत्ते।

१.प्रशासनाधिकारो लोकेच्छया विरचयिष्यते।

२.इयमिच्छा कालबद्धैः: नियमोचितैश्च निर्वाचनै: प्राकाश्यम् आगमिष्यति। इमानि निर्वाचनानि च वैश्विकेन समानेनैव गुप्तमतदानेन अथवा तत्सदृशेनैव केनापि मतदानविधिना सम्पत्स्यन्ते।

**अनुच्छेद: 22** प्रत्येक एव जन: सामाजस्य सदस्यता कारणेन सामाजिक-सुरक्षाया सर्वमधिकारं भोक्तुं समर्थः। असौ हि जनः निजव्यक्तित्वस्य सार्वङ्गिकं विकासार्थं राष्ट्रीयप्रयासेन आन्ताराष्ट्रीयसहयोगेन च राज्यस्य प्रत्येकसंघटनसंसाधनानुरूपम् स्वीयाविभाज्यार्थिकसामाजिकसांस्कृतिकाधिकाराणां प्रतिष्ठायै संसिद्धिं प्राप्तुमर्हति।

**अनुच्छेद: 23** प्रत्येक एव जनः वृत्तिराहित्यस्य विखण्डनाय संरक्षणमधिगन्तुं स्वानुकूलकार्यस्थितींश्च न्यायसंगताः कर्तुं स्वतन्त्रवृत्तिचयनं च विधातुं कार्याणि चानुष्ठातुम् अधिकारं धत्ते।

१.प्रत्येक एव विनैव भेदभावम् सम-कार्याकरणाय समान-वेतनमानं (पारिश्रमिकं) अधिगन्तुं अधिकृतोऽस्ति।

२.कार्यनिरतश्च त्येकह् जनः स्वात्मनः स्वपरिवारस्य च मानवगौरवसंवर्धनयुतस्य जीवनस्य संरक्षणार्थं समुचितानुकूलपारिश्रमिकादानस्य अधिकारं धारयति। आवश्यके सति चासौ सामाजिक-संरक्षणस्य अन्योपायैरपि एतत्सामर्थ्यं धारयितुं सर्वथा प्रभवति।
३.स्वीयहितानां संरक्षणार्थं प्रत्येकः श्रमिकसंघटनैः साकं स्वात्मानं संयोजयितुं एतादृक्-संघटनं वा संरचयितुं अधिकृतोऽस्ति।

**अनुच्छेदः 24** कर्तव्यकार्यनिर्वाहार्थं निश्चितहोराणां समुचित-नियमन-पुरस्सरम् तथा च सवेतनेन नियतावधिकावकाशेन सह विश्रमाधिकारः एतज्जनस्य विश्रामसुखेऽपि भोक्तुं अधिकारः वर्तते।

**अनुच्छेदः 25** प्रत्येकः जनः खाद्यवस्त्रावासचिकित्सोपचर्यादिभिः, आवश्यकसामाजिकसेवाभिश्च सह स्वस्य स्वीयपरिवारस्य च अनामयतायै स्वस्थतायै च पर्याप्तं जीवनस्तरं संधारयितुं अधिकृतोऽस्ति। अपि च, नियन्त्रण-शून्यासु परिस्थितिषु अन्यस्मिन् जीवकोपार्जनाभावे युद्धावस्थायां, वैधव्यप्राप्तौ, अयोग्यतायां, रुग्णतायाम् अनाजिविकायां स्थितौ च सत्याम् प्रत्येकमपि सुरक्षाधिकारं सन्धारयति।
१.मातृभावस्य शिशुत्वस्य च कृते विशिष्टसाहाय्योपचर्या जातं प्रदेयं भविता। अवैधाः वैधाश्च सर्वेऽपि बालाः समानं सामाजिकं संरक्षणं अवाप्तुं अर्हन्ति।

**अनुच्छेदः 26** प्रत्येक एव जनः शिक्षाप्राप्त्यधिकारं संधत्ते। प्राथमिकेषु मौलिकस्तरेषु च शिक्षा निःशुल्का भविष्यति। प्राथमिकी शिक्षा अनिवार्या भविष्यति। प्राविधिकी व्यावसायिकी च शिक्षा सामान्यतया सर्वेभ्यः उपलब्धा उपपादयिष्यते उच्चतरा च शिक्षा सर्वेषामपि कृते योग्यताधारेण समानरूपेण प्राप्या भविष्यति।

१.शिक्षैषा मानवीय व्यक्तित्वस्य सर्वांगीण-विकासं प्रति निर्दिष्टा भविष्यति अपि चैषा मौलिक स्वातन्त्र्याणां मानवाधिकाराणां च कृते सम्मान-संवर्धिका भविष्यति। सर्वेष्वपि राष्ट्रियेषु जातीयेषु धार्मिकेषु-वा केश्वपि वर्गेषु शिक्षैषा सख्यसहिष्णुतासद्भावसंवर्धिका वर्तिष्यते। अपि चैषा शान्तिसंधारणार्थं संयुक्तराष्ट्रसंघस्य कार्यप्रणालीप्रक्रियाम् इतोऽप्यग्रे प्रसारयिष्यति।

२.पितरावेव बालानां कृते प्रदेयां शिक्षां चेतुं प्राथमिकमधिकारं धारयतः।

**अनुच्छेदः 27** सर्वोऽपि जनः विविधकलानां आनन्दसन्दोहमनुभवितुं वैज्ञानिकोपलब्धीनां लाभान् च संभोक्तुं विभिन्नानां समुदायानां सांस्कृतिक-जीवने च स्वतन्त्रतया सहयोगं कर्तुं अधिकृतोऽस्ति।

१.यस्य कस्यापि वैज्ञानिकस्य साहित्यिकस्य कलात्मकस्य च रचनाकर्मणः यस्यासौ रचयितास्ति नैतिकानां वस्तुगतानां हितानां संरक्षणार्थं प्रत्येकः जनोऽधिकारं संधत्ते।

**अनुच्छेदः 28** प्रत्येकः जनः अस्यां अभिघोषणायां निर्दिष्टानां अधिकाराणां स्वातन्त्र्याणां च प्राप्तये सामाजिकान्ताराष्ट्रिक-व्यवस्थायां च पूर्णतया एतान् अधिगन्तुमर्हिष्यते।

**अनुच्छेदः 29** प्रत्येकः जनः समुदायस्य कृते एतादृशं कर्तव्यदायित्वं धारयति येन हि स्वीय-व्यक्तित्वस्य पूर्णः स्वत विकासः संभवेत्।

१.प्रत्येकः जनः स्वीयाधिकार-स्वातन्त्र्याणां क्रियान्वयने अपि च अन्येषां अधिकारस्वातन्त्र्यं प्रति समुचिताभिज्ञानादरसंरक्षणादेषः नूनं व्यवहरिष्यति। अपि चासौ

लोकतान्त्रिकसमाजे सामान्यकल्याणं सार्वजनिकव्यवस्थां नैतिकतायाःसमुचितावश्यकताश्च प्रति पूर्णं दायित्वं निर्वक्ष्यति।

२.एतेऽधिकारा: एतानि स्वातन्त्र्याणि च संयुक्तराष्ट्रसंघस्य उद्देश्यानां सिद्धान्तानाञ्च विरोधाय न कथमपि प्रयोक्ष्यन्ते।

**अनुच्छेद: 30** कोऽपि जनः अस्यां अभिघोषणायां निर्दिष्टानां अधिकाराणां स्वातन्त्र्याणां च विनाशाय विकृतये वा किमपि असदृशं कार्यमनुष्ठातुं न शक्ष्यते। एतादृक्कार्यानुष्ठानार्थं वा कस्यचिदपि राष्ट्रस्य वर्गस्य जनस्य वा समीहितसिद्ध्यर्थं विपरीततया व्याख्यातुं नैव शक्ष्यते।